# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (२७)

१९.१२.२०११

# चकारान्ताः पुंलिङ्गाः

- चकारान्तः पुंलिङ्गः ‘प्राच्’ शब्दः ।
- ‘ऋत्विग्..’ इत्यादिसूत्रेण अञ्चेः सुप्युपपदे क्विन् ।
- अन्चु गतिपूजनयोः ।
- प्र अञ्चति = गच्छति इत्यर्थे
- प्र अन्च्  (क्विन्) व् (‘ऋत्विग्दधृक्...’ - ३.२.५९)
- प्र अन्च्       (‘वेरपृक्तस्य’ - ६.१.६७ - इति वलोपः)

# ४१५. अनिदितां हल उपधायाः क्ङिति (६.४.२४)

- चत्वारि पदानि । अनिदिताम्, हलः, उपधायाः, क्ङिति ।
- 'अङ्गस्य' (६.४.१) इति अधिक्रियते । 'श्नान्न लोपः' (६.४.२३) इत्यतः 'न लोपः' इति अनुवर्तते ।
- हलन्तानाम् अनिदिताम् अङ्गानाम् उपधायाः नस्य लोपः स्यात् किति ङिति च ।

- प्र अच् ('अनिदितां...' इति नलोपः)
- प्राच् ('अकः सवर्णे दीर्घः' - ६.१.१०१)

- ‘उगिदचाम्…’ इति नुम्, ‘संयोगान्तस्य लोपः’, नुमो नकारस्य ‘क्विन्प्रत्ययस्य कुः’ इति कुत्वेन ङकारः, प्राङ् ।

- प्राच्  (सुँ) स्
- प्रा न् च्    स्  (‘उगिदचां सर्वनामस्थानेऽधातोः’ - ७.१.७०)
- प्रा न्  च्        (‘हल्ङ्याब्भ्यो ….’ - ६.१.६८)
- प्रान्            (‘संयोगान्तस्य लोपः’ - ८.२.२३)
- प्राङ्            (‘क्विन्प्रत्ययस्य कुः’ - ८.२.६२)

- अनुस्वारपरसवर्णौ, प्राञ्चौ ।
- प्राच्  औ
- प्रा न् च् औ (‘उगिदचां सर्वनामस्थानेऽधातोः’ - ७.१.७०)
- प्रांच्   औ     (‘नश्चापदान्तस्य झलि’ - ८.३.२४)
- प्राञ्चौ                    (‘अनुस्वारस्य ययि परसवर्णः’ - ८.४.५८)
- प्राञ्चः ।
- प्राञ्चम्, प्राञ्चौ ।

- प्राच् (शस्) अस्

# ४१६. अचः (६.४.१३८)

- एकपदात्मकं सूत्रम् ।
- ‘अङ्गस्य’ (६.४.१) इति, ‘भस्य’ (६.४.१२९) इति च अधिक्रियते । ‘अल्लोपोऽनः’ इति अनुवर्तते ।
- लुप्तनकारस्य अञ्चतेः भस्य अकारस्य लोपः स्यात् ।

- प्र अच् अस्
- प्र च् अस् (‘अचः’ इति अकारलोपः)

# ४१७. चौ (६.३.१३८)

- एकपदात्मकं सूत्रम् ।
- ‘ढ्लोपे पूर्वस्य दीर्घोऽणः’ (६.३.१११) इत्यतः ‘पूर्वस्य दीर्घोऽणः’ इति अनुवर्तते ।
- लुप्त-अकार-नकारे अञ्चतौ परे पूर्वस्य अणः दीर्घः स्यात् ।

- प्र च्  अस्
- प्राचस्  (‘चौ’ इति दीर्घः)
- प्राचर्
- प्राचः

- प्राचा ।

- प्राच्  भ्याम्
- प्राक्  भ्याम् (‘चोः कुः’ - ८.२.३०)
- प्राग्भ्याम्     (‘झलां जशोऽन्ते’ - ८.२.३९)

- प्रत्यङ्, प्रत्यञ्चौ, प्रत्यञ्चः ।
- प्रत्यञ्चम्, प्रत्यञ्चौ ।

- ‘अचः’ इति लोपस्य विषये अन्तरङ्गोऽपि यण् न प्रवर्तते ।
- ‘अकृतव्यूहाः पाणिनीयाः’ (प) इति परिभाषया ।
- निमित्तं विनाशोन्मुखं दृष्ट्वा तत्प्रयुक्तं कार्यं न कुर्वन्तीत्यर्थः ।
- प्रति अच् (शस्) अस्
- प्रति च् अस् (‘अचः’ इति अल्लोपः)
- प्रतीचस् (‘चौ’ इति पूर्वस्य अणः दीर्घः)
- प्रतीचः ।
- प्रतीचा ।
- प्रत्यग्भ्याम् इत्यादि ।

- ‘अमुम् अञ्चति’ इति विग्रहे ‘अदस् अन्च्’ इति स्थिते ।
- अदस् अम् अन्च्
- अदस् अम् अन्च् (क्विन्) व् (‘ऋत्विग्दधृक्...’ - ३.२.५९)
- अदस् अम् अच् व् (‘अनिदितां हल उपधायाः क्ङिति’ - ६.३.२६)
- अदस् अम् अच् व् (‘उपपदमतिङ्’ - २.२.१९)
- अदस् अच् व् (‘सुपो धातुप्रातिपदिकयोः’)
- अदस् अच् (‘वेरपृक्तस्य’ - ६.१.६७)

# ४१८. विष्वग्देवयोश्च टेरद्र्यञ्चतावप्रत्यये (६.३.९२)

- षट् पदानि । विष्वग्-देवयोः, च, टेः, अद्रि, अञ्चतौ, अप्रत्यये ।
- 'आ सर्वनाम्नः' (६.३.९१) इत्यतः 'सर्वनाम्नः' इति अनुवर्तते ।
- अनयोः सर्वनाम्नः च टेः अद्र्यादेशः स्याद् अप्रत्ययान्ते अञ्चतौ परे ।
- अप्रत्यये = नित्यम् अश्रूयमाणत्वात् अविद्यमानः प्रत्ययः क्विबादिः यस्माद् इति बहुव्रीह्याश्रयणम् ।

- अदस्  अच्
- अद् अद्रि  अच्  ('विष्वग्देवयोश्च...')
- अदद्र्यच्       ('इको यणचि')

# ४१९. अदसोऽसेर्दादु दो मः (८.२.८०)

- षट् पदानि । अदसः, असेः, दाद्, उ, दः, मः ।
- अदसः असान्तस्य दात्परस्य उदूतौ स्तः दस्य मश्च ।
- उ इति ह्रस्वदीर्घयोः समाहारद्वन्द्वः ।
- आन्तरतम्याद् ह्रस्व-व्यञ्जनयोः ह्रस्वः, दीर्घस्य दीर्घः ।

- अदद्र्यच्   (सुँ) स्
- अदद्र्य न् च्   स्      (‘उगिदचां सर्वनामस्थानेऽधातोः’ - ७.१.७०)
- अदद्र्य न् च्            (‘हल्ङ्याब्भ्यो…’ - ६.१.६८)
- अदद्र्यन्      (‘संयोगान्तस्य लोपः’ - ८.२.२३)
- अदद्र्यङ्      (‘क्विन्प्रत्ययस्य कुः’ - ८.२.६२)
- अ द् अ द् र् य् अ ङ्
- अ म् उ म् उ य् अ ङ्(‘अदसोऽसेर्दादु दो मः’ - ८.२.८०)
- अमुमुयङ्

- अदद्र्यच्   औ
- अदद्र्य न् च्   औ    (‘उगिदचां सर्वनामस्थानेऽधातोः’ - ७.१.७०)
- अद् अ द् र् य् अ न् च्    औ
- अम् उ म् उ य् अ न् च्   औ   (‘अदसोऽसेर्दादु दो मः’ - ८.२.८०)
- अमुमुयंच् औ          (‘नश्चापदान्तस्य झलि’ - ८.३.२४)
- अमुमुयञ्चौ (‘अनुस्वारस्य ययि परसवर्णः’ - ८.४.५८)

- अमुमुयञ्चः ।
- अमुमुयञ्चम्, अमुमुयञ्चौ ।

- अदद्रि अच्  (शस्)  अस्
- अदद्रि      च् अस्      ('अचः' - ६.४.१३८ - इति अल्लोपः)
- अदद्र्  ई  चस्      ('चौ' - ६.३.१३८ - इति दीर्घः)
- अमुमुईचः      ('अदसोऽसेर्दादु दो मः' - ८.२.८०)
- मुत्वस्य असिद्धत्वात् न यण् ।

- अमुमुईचा, अमुमुयग्भ्याम् इत्यादि ।
- अदद्र्यच्  भ्याम्
- अदद्र्यग् भ्याम्        ('चोः कुः' - ८.२.३०)
- अमुमुयग्भ्याम्        ('अदसोऽसेः...' - ८.२.८०)

- ‘अन्त्यबाधेऽन्त्यसदेशस्य’ इति परिभाषाम् आश्रित्य परस्यैव मुत्वं वदतां मते ‘अदमुयङ्’ ।
- ‘अः सेः=सकारस्य स्थाने यस्य सः असिः, तस्य असेः’ इति व्याख्यानात् ‘त्यदाद्यत्वविषय एव मुत्वं नान्यत्र’ इति पक्षे ‘अदद्र्यङ्’ ।
- उक्तं च (भाष्ये)
- ‘अदसोऽद्रेः पृथङ्मुत्वं केचिदिच्छन्ति लत्ववत् ।
- केचिदन्त्यसदेशस्य नेत्येकेऽसेर्हि दृश्यते’ ॥ इति ।
- लत्ववत् - कृपो रो लः
- चरीकृप्यते -> चलीक्लृप्यते ।

- ‘विष्वग्देवयोः’ किम्?
- अश्वाची ।
- ‘अश्वम् अञ्चति’ इति विग्रहे विष्वग्-देव-सर्वनाम्नाम् अभावात् अद्र्यादेशो न ।

- ‘अञ्चतौ’ किम्?
- विष्वग्युक् ।

- ‘अप्रत्यये’ किम्?
- विष्वगञ्चनम् ।
- श्रूयमाण-ल्युट्-प्रत्ययान्तत्वात् न अद्र्यादेशः ।

- अप्रत्ययग्रहणं ज्ञापयति, अन्यत्र धातुग्रहणे तदादिविधिः इति ।
- तेन अयस्कारः ।
- ‘अतः कृकमिकंसकुम्भपात्रकुशाकर्णीष्वनव्ययस्य’ (८.३.४६) इति सः ।